*तिकेचित । वक्तृतत्र । अतिकटुदूषकतावीजमेतत्प्रतिकूलगुणानभिव्यंजकत्वं मतं ८ — हित विसर्गं
चतुर्थ २ — कृष्णस्य ~

वितर्तयं
७२
२ कृतीयं ८२
३ वीत

तुलथी
जक १
त
प्रतिकूल
८२

इदानीं पददोषानाह। प्रतिकूलवर्णलुप्तहतलुप्तविसर्गविसंधिहतवृत्तं। न्यूनाधिककथितपदपतत्प्रकर्षसमाप्तपुनरात्तं। अर्द्धां-
तरैकवाचकमभवन्मतयोगमविहितवाच्यं। अपदस्थसमासं संकीर्णं गर्भितप्रसिद्धिहतं। भग्नप्रक्रममक्रमममतपरार्थं वाक्य-
मेव तथा ११

दोष। ... दोष १ च्युतसंस्कृतत्वं

नानापदं दुष्टशब्दत्वं नानापदव्यक्तिकर्तृत्वं वा ... ति कौमुदीकृन्मतं तत्र च्युतसंस्कृ-
त्यादिष्वव्याप्तेः। नानापददोषैरघितत्वं कर्तृत्वं वा। केचित्तु पदांतरसमभिव्याहारविशेषतत्त्वभावान्व-
यप्रयुक्तदोषत्वं वाक्यदोषत्वं। तत्र श्रुतिकटुच्युतसंस्कृत्यनुचितार्थश्लीलग्राम्याविमृष्टविधेया-
शेषेषु। तेःपदांतरसमभिव्याहारापेक्षणात्। इतरेषु तु पददोषत्वमेवेति वदंति। तन्नुच्छं। काव्यप्रकाश-
विरोधात्। असमर्थाद्यभिमतदोषत्वं स्यात्। तत्रान्यतराभावस्य सत्त्वात्। वयं तु। पदांतरसमभिव्या-
हारप्रयुक्तदोषत्वं वाक्यदोषत्वं। श्रुतिसंस्कृतिदोषेष्वेवं दोषत्वानामव्याप्तिः शंका। नचमेघनादेति
त्यादौ श्रुतिकटुत्वादेरपि पदांतरसमभिव्याहारप्रयुक्ततया तादृशभावादव्याप्तिरिति वाच्यं। तत्रापि नहि
तत्र मेघनादेति श्रुतिकटुत्वमपि तत्संभवात्। किंच। तत्रापि शृंगारवीररौद्रादिभावानुपस्थापक-
पदस्यापि श्रुतिकटुत्वात्ततः। पदांतरसमभिव्याहारप्रयुक्तदोषत्वस्य सत्त्वान्नाव्याप्तिशंका। न
च च्युतसंस्कृत्यादेरपि साधुत्वसाधकादेवास्ति दोषत्वमिति वाच्यं। वाक्यांतरवृत्तकेवलस्यापि दुष्टत्वात्
तत्र श्रुतिकटुत्वादेर्नपददोषत्वे स्थात् अपितु वाक्यदोषत्वमिति वाच्यं। तदेवं तत्त्वमपायात्। इति क्रमः। अत्र प्र-
तिकूलवर्णादेरसमस्तरचनोपलक्षणपरं। ... दोषकालि। प्रतिकूलवर्णत्वं वाक्यदू-
षणमः। साकांक्षनानापदपर्याप्तदोषत्वं ... अत एव च्युतसंस्कृ... दीनां प्रत्येकपदेषु पर्याप्तदोषत्वान्नवा-
क्यदोषत्वं। श्रुतिकटुत्वादौ नानुपपत्ते ... दोषत्वं। अत एव
त्यादि स्पष्टं वने। ...

अत्र काव्यप्रकाशकाराः

शम्भु मित्यत्र किंचिल्लिंगकमिति कोविलिंगात्मकत्वस्य च कुत्सयकत्वात् । एवं नेयार्थमपि न त्वर्जनोसमर्थ
लक्षणार्थप्रयोगनत्वनियमार्थेर्गत् । तेनहस्तेस्य प्रतिबिम्बादीर्थमिति तस्य प्रयोगनस्यवस्तु शक्यत्वा
च । इदं नो वाक्यदोषाः ५ नोह । अथास्य च्युतसंस्कारमसमर्थं निरर्थकं । वाक्ये पि दोषाः संत्येते पदस्यांशेपि के
चन । प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसंधि हतवृत्तम् । न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तं
। अर्द्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यं । अपदस्थसमासं संकीर्णं गर्भितं प्रसिद्धिहतं । भग्न
प्रक्रममक्रममतपरार्थं वाच्यमेवं तथोक्तिकाव्यप्रकाशकाराः । अत्र केचित् । श्रुतिकटुत्वादिवच्च्युतसं
स्कृतत्वादीनामपि कुतो न वाक्यदोषत्वमित्याशंक्य दर्शितं सांप्रतं । तत्राहुः । विवक्षितधर्मोपस्थापकश
ब्दगतत्वे सति नापदवृत्तित्वं वाक्यदोषत्वं च्युतसंस्कृत्यादिव्यावर्तनाय सत्यंतं । च्युतसंस्कृता
दीनां विवक्षितधर्मोपस्थापकशब्दगतत्वाभावादित्याहुः । तन्न । च्युतसंस्कृत्यादित्रयं व्यावर्तकविशे
षणवत् अप्रयुक्तव्यावर्तकविशेषणस्याधिकविसंवादायोग्यत्वे यन सप्तुक्तत्वादेः पुनरुक्तत्वेन दोषा
मपि वाक्यदोषत्वोनापत्तेः । अथाय केऽप्याते विवक्षितधर्मोपस्थापकशब्दगतत्वाभावान् । यत्तु
त । साधुशब्दस्येव तथात्वा ॥ ५२

२३

०१६

४१

ल्पाभा वाच्य १

यथावा। तवकंठास्थजासितां करवाललताद्विषाम्। अस्कृते समरारण्ये यशःकुसुमसंचयम् ६

प्रतिपाद्यविरुद्धबोधजनकत्वेन तत्त्वमित्यन्ये। केचित्तु तात्पर्यविषयीभूतार्थप्रतीतिविघटकीभूतोऽसभ्यार्थधी
जनकत्वं तत्त्वं। अनुचितार्थाश्लीलयोरर्थानां न परस्परं प्रतिबंधकृतो। श्लिष्टता। श्लिष्टार्थे चविरुद्धे न प्रतिप
त्तिरिति तेष्वो मेदई स्याकुः। यथा। २ तस्यमेव भूपाल भूतलोपकृतो कृतो। अत्र भूतानां लोप इति प्रतीतिरिति
विरुद्धमतिकृत। यथावा। सुधाकरकराकारविशारदविचेष्टितः। अकार्यमित्रमेकोसौ तस्य किं वर्णयामहे।
अत्र कार्यं विना मित्रमिति विवक्षितं। अकार्ये सुमित्रमिति प्रतीयते। समासावयवस्य नञो निषेधार्थत्वं न
लघुत्वं। तस्मात्प्रर्यतपूर्व्वतदल्पत्वविधेयविमर्शः। अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्तिताः। दूषकता
बीजं चात्र प्रकृतविरुद्धार्थभानप्रतीतिः। अतएव नञ्प्रकाशितविरुद्ध दूषकताबीजस्य कथ्यं। तत्र प्रकृतार्थ
स्याभिमतीतिरिति चेत्। नस्कन्नस्क। सुतरां स्फुटलनमर्थानुचितार्थश्लीलार्थकाव्यकाश्लीलसंदिग्धाप्रतीत
क्लिष्टाविमृष्टविधेयांशविरुद्धमतिकृतो काव्यकाव्यसाधारणानां तामेवविशिष्यो पादानप्रयासवैज्ञ
नानवधारणामः। सत्यं तु यासलेकवेरनादरणाकन्योऽमी ये दोषपर्यवसंयंतोऽस्यप्रयुक्तं मंपिन दूषणी। एवं श्लिष्ट
तार्थमपि न दूषणसौंदिग्धप्रयोगविलंबस्याकिंचित्करत्वात्। एवं चान्यैकत्वादिपदश्लो ताभिनेवादिपदम

दहर २ तादूषर ३

...न्ते
...दोषः

मिथीयते ।

सतात्पर्यो नाभिधकर्तृतायन्महत्त्वेन तत्संकेतादिरहितो मिथ्यावस्त्वर्थतः स नगरी र[illegible] असामर्थ्यमिति प्रतीतिः स्थि
ष्यति । तत्र मिथ्यार्थं तु जग्राहावन्यपदार्थसामान्येनत्तुरणीकृतमित्यविमृष्टविधेयांशता । अयमाशयः । उद्देश्य
विधेययोर्यदि द्रव्यकृपया आनुपूर्वीनिष्ठतेन दासा समुद्दिश्य सा लैविधीयते । एवं तो वा [illegible] नितिवत् ननु समा
सेऽन्यथा वक्तुमनस्यैवं तद्दस्य [illegible] ती ते । एवं कृतावान्तं वाक्य प्रधानतया कविना त्वस्य विषयीकृतस्य प्राधान्या
प्रतीतिः स्वर्णमपहृत्य वा सा सिवक्त्रो यथापि वन्याजमनुहरन्ती तिध्येयं । अनूद्यविधेयभावसंसर्गस्य विशेष
णविशेष्यभावद्वयापत्यर्थाभिधाकार्यप्रतीतौ भासते इति तात्पर्यम् । यत्राप्रकृतविरोधे न प्रकृतस्य विरो
धिता । विरुद्धमतिकृतास्या त्सर्वकार्येषु दूषणम् । प्रकृतप्रतीतिप्रतिबंधे का प्रकृतप्रतीतिजनकत्वमिति नि
र्गलितोर्थः । नवनिहि तार्थे अतिव्याप्तिरित्याशंक्यां तत्रावि लंबाविलंबेनोभयार्थप्रतीतेः । नया तथा [illegible] र्थप्रतिपं
थीयस्यार्थस्य कुत्र एव संभवति ॥ विपरीतकल्पनं तत्कृतंति पदमकार्यमिति भावे निरुद्ध दोषे । अत एव नाल ते
परार्थे अतिव्याप्तिशंकाधि । श्लो [illegible] व्याप्ति [illegible] मयोरेव प्रकृतत्वात् । उभयोरेवाप्रकृतत्वात् । प्रति
बन्धसतिबंधकभावाभावाद्य । न च प्रकृतप्रतीतिजनकत्वमेव सम्यगिति वाच्यं । अवाचकासमर्थयोरतिव्याप्तेः ॥
× ननु भद्रात्मनद्वत्याद्यभिधामूलध्वनावतिव्याप्ति [illegible] रिति शंका । तत्राप्रकृतप्रतीतिप्रतिबंधक ।
× प्रकृतप्रतीतेः सत्त्वात् । प्रकरणेनापरार्थप्रतीतिजनकशक्तिप्रतिबंधात् । प्रकृतप्रतीतिविलंबाभावाच्च ।

कृ ३

स्वकलत्रमित्यत्रापेक्षितं। ननु तोनकलत्रमित्यत्र तालसंबंधस्य कलत्रविशेषणता कर्तृकलत्रवैत
न्यस्येत्यत्रापि तथैव दोषः। प्रथमान्तपदोपस्थाप्यानि [illegible] सर्वस्यैव विशेषणता तथा अन्वयस्य मु
ख्यविशेष्यतां केयमेव भिन्निधेत। उच्यते। नहि विशेष्यत्वमात्रेण विधेयत्वं। प्रथमान्तो वीहि मानि त्या
दो विशेषणत्वेव बहुव्रीहादेर्विधेयत्वानवगमात्। नापि विशेषणत्वमात्रेण। [illegible] नाधेय
त्वस्य पर्वतादेर्विधेयत्वानवगमात्। किंतु विधेयत्वं मन्दघर्त्रे विधेयत्वं। विधेयत्वं विधेयत्वौ
चनसमर्थं यासमस्तमेवतन्न तु समस्तौ। असमस्तमपि अनुवादोपस्थापकपदानंतरोच्चरितमे
वअनएवन्यक्कारो ह्ययमेवेत्यविमृष्टविधेयांशता। तथैव या दृश्यस्तामा [illegible] यथा

दा

वा। मूर्धाभुक्तहलाधिरलगलग्नस्कंसकधाराधौतेशोघ्रिप्रसादोपनतजयजगज्जाते

ग्रं

भिथ्यामहिम्नां। कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सार्पिदर्पोद्धुराणां दोष्णां चैषां किमेत
त्कलभितनगरीरक्षणे प्रयासः। अत्र मिथ्यामहिम्नामिति नानुवाद्यमपि तु विधेयं। अर्थान्त

प्रस्त्र

थान्तरैर्मिथ्यामहिमत्वं जाते तदा [illegible] नगरीरक्षणे प्रयासोनानुचितः। यत्र विधेयः स्यान्ना

पा ५

हृ० लक्षणम्।   ...त्यर्थः।   लक्षणादरात्। पदार्थप्रतीतौ विलंबे भावात्।

यिकतानेयार्थता सममजो नुक्तार्थबाधादेन्नर्यते विरु इति। अनन्तर प्रयोजनमर्थ तरेणेकवरघुत्यन्निप्रतिसंधा
ने नवे रस्यापादकत्वं रूपकताबीजं। आसत्यादि विलंबेन नान्वयो प्रभासते। तस्माद्यं क्लिष्टमिप्याक्रूरलंकारविशे
षणं। तद्यथापि। एकपद प्रतिपाद्य प्रकृत पदार्थ ज्ञानमनुगुणमपरपदार्थ ज्ञानं कृतव्यवधानतादि त्वेसति विलंबि
तोर्थप्रतीतिजनकत्वं। किंतु तार्थे अतिव्याप्तिवारणाय सत्यंतं। नचाप्रयुक्ते अतिव्याप्तिरिति कातेग्रपदार्थत्वेन
भिन्नैवाक्यता नापन्नत्वेन सत्क्लेर्नाति व्याप्तिः। यथा। मध्यगतगो नसारोयस्या वन मे वन मध्यगतसवर्णं। तद्भाव
कस्यतु हेतुः पायाद्वो मध्यमः स्वराः। अस्यार्थः। मध्ये गतः गकारोयस्य स मध्यगतं गच्छता द्याः सार। सागर इत्यर्थः।
सैयस्याः पृथिव्याः मध्यगतसवर्णं विनेवसर्वं। तद्भारको हिमाचलः तस्यसुहेतुः मध्यमः स्वरः। मस्याम्स्यर्थः स पा
यात्। रूपकताबीजं चात्र तात्पर्यविषयी भूतार्थप्रत्यय विलंबः। केचित्तु व्यवहितनपदार्थप्रतीति साधनत्वे
क्लिष्टमिप्याकुर्वन्नातिहितार्थं तिव्याप्तेः। समासे नगुप्ती भूतं विधेयं यत्र जायते। अविमृष्टविधेयांशो
ऽर्दोषमनीषिणः। वक्ता ... प्रधानत्वेनेस्वप्राधान्य प्रत्यायकत्वं साहित्यं तत्वं। यथार्थं किं लोके न विलंबितः
सम्भरतोय नैतदेवं कृते मातृमात्रेल पुनांगता किमथवां माने वमे मध्यमा। ... तन्म मध्यवित्तिनेदिति
यम प्यात्पनुज्ञो सोऽणुरूम्भा तातातकलत्रमित्यनुचितं शंकेविधा शङ्कते। अत्रार्थस्य अनुज्ञस्ता त

आविवक्षि०२   मानामातं द्वारा।

मेधुर्मे ४
एतदृश्योपि। उदारता गुणाव्यं जकपदत्वम् २

गध ४ ति २

ता। नचानिहितार्थेनास्य संकरः। तत्र व्यवधाना व्यवधानतया उभयार्थप्रतीतेः। अत्र च प्रकृतार्थप्रतीत्यनारोहात्।
षड्वे दविदग्धो क्तं तत्पदं ग्राम्यमुच्यते। तथा हि पदं त्रिविधं। ग्राम्यं नागरमुपनागरं चेति। तत्रापि स्वरूपशोभारहितं।
अन्येपा उक्तं ग्राम्यं चेत्को तेर्थपर्वणा तालं ग्राम्यमित्यभिधीयते। यथा। स्वर्हे जीमन्तुत्ला लीते काटं स्वन्तोपदायिनी। त्वौप्रे
स्यु २ स्यव्यंभनं कर्तुं यातिमान्यव जमानसं। रूपकतावीजं वा कवे रक्षैदण्धप्रकलस्तिवनी। कृष्टिप्रयोजनाभावाल्लौ-
लाभासमिर्षरात्। कल्पितार्थत्वं वेघ क्लिष्टत्वे यार्थप्रवृत्ततेन चलच्छायाविरहे कपोपकल्पोपस्थितिशिनिर्वाच्यं। ल ४
र्थस्य तो पदार्थोपस्थितौ सर्वं धमानस्यत्वं चवाद। नाहि लंबक्लिष्टबोधे दृष्टित्वं प्रयोजकं। गौरवॉघस्मिभावाच। यथा। सप
दिपंक्तिविहंगमनामभृत्सनयसंबलितं बलिसालिना। विपुलपर्वतवर्षिशतैः शरैः प्लवगसैन्यमुलूकजिता न्मान ६
जितं। अत्र विहंगमपदं कवाको अभिप्रेतः ...मानिप क्वाणितानि विशन्ती लिविहंगनामभृतो रथाः पंक्ति
रथास्तैर्व्या लभ्यते पंक्तिर्दशाविहंगनामाभृतो रथा यस्य स पंक्तिविहंगनामभृत्‌ दशरथः। तज्जनया भ्यी राम
लक्ष्मणाभ्यां संबलितं लवणसैन्यमुलूकजिता इन्द्रजिता जितं। न चात्र प्रयोजनं प्रतीयते। कष्टकल्पनया
पथा कथंचिदारम्याने अप्रत्ययत्वात्। न चात्र क्लिष्टे दूसंप्रदायोविरहात्। उक्तं चैतदग्निपुराणे। असाम

गन्त ४ स्य १ किंचित २

भि तथा

तद्विधिभिन्नास्तीत्यर्थः । काचित् क्रमेण यथा । गत्वाथ नोन्नतिर्यात्या कुलं तमसुरवरदायिनी । परार्थं वा स्वकर्मणीयत्स्यार्थं पेलवे
धने ॥ मेनुमेथरगतिः पलोऽस्तुलोशीकरोत्यवहन्नभ्रमादिव । केनकीवनाधिहारकोऽस्तुनीवासुरासुरभवस्ब्यनोऽस्तुवः ॥ निर्वाण
वैरदहनाः प्रशमादरीणां नंदन्तु पांडुतनयाः सह माधवेन । रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः
सभृत्याः ॥ अत्र क्रमेण व्रीडाजुगुप्सा । मंगलार्थेऽकतोदग्लीलता । रूपकतावीजं या न्नास्त्यार्थप्रतीतिः । ओत्रियमं
डलीषु वेदोलगिमनेनिवा किमधिवैरस्यमापादयतीति ज्ञेयं । संदिग्धत्वं तु वेदन्ननात्सर्व्यार्थस्यसंशयः । तदर्थोऽधि अभि
तीर्नत्वात्सर्व्यार्थकपदार्थ्यपस्थापकपदत्वं । यथा । सम्भ्रान्तमाभाषयशान्कमहापदमुपागतः । रूपकतावीजं यथा च तात्सर्व्यनि
र्णयाभावः । अप्रतीतमिदं माऽत्र केवले शास्त्रे भाषितं । अत्र ... प्रवर्ततिमनोविज्ञाः । मतिशास्त्रे प्रतीते
प्रतीतेन प्रतीतम प्रतीतं । यत्किंचिच्छास्त्रपारिभाषिकमित्यर्थः । यथा । न पक्षवृत्तिर्न सपक्षवृत्तिर्विपक्षवृत्तिः केरवाले
भूमेः तथापि तेन विक्रम ... भाल प्रतापवह्नेः प्रमितिं करोति । अत्र पक्षादिशब्दा हेतौ शास्त्रपारिभाषिताः । रूपकतावी
जं यथा असेकेन ज्ञानविग्रहः । न चास्य समर्थवाऽसां कर्थ्य ... वाच्यो । तत्र गणपाठात्सर्वत्र ... तेपि संबंधितावच्छेदके
संबंधाग्रहणात्

तथा।
५६
न्याप ५
२.२
४

नी
भि
२.८

दिप्तितिदि क २

र्वाबोधमादपकृष्टस्य ककारस्योत्कर्षबोधनादनुचितार्थमिति प्राञ्चः। तन्न। चंद्रो मुखमित्यत्रापि तथात्वापत्तेः। तथा चो
पमास्तूपकोपमादालामनल्लीकारात्स्वार्थत्वौ। यत्रोनिर्भी हमात्रार्थप्रकृतानन्वितं चेत्यत्। वदंति कवयः सर्वे निरर्थकमिदं प
दम्। निरर्थकलितार्थस्य वाक्यार्थप्रत्ययानुकूलार्थप्रत्यायकत्वराहित्ये अधिकपदे च वाक्यार्थप्रत्ययानुकूलार्थप्रत्यायकत्व
मस्त्येव। परं तु तद्व्यतो लघ्वमिति न ते नसांकर्यम्। यथा। विप्रवल्ली कुञ्जरमंस्मरली अस्वस्य दा। विभाव्य कामहे वंदे लीबोधद
समहं हि तु। इह कतार्थाञ्जे चात्र प्रकृतानन्वितत्वात्स्यार्थबोधास्पत्प्रतीतिः। कवेरशक्तिरत्रैषामिति यपरे। अवाचकमिदं प्राञ्च
रसंकेताद्बोधकं। असमर्थं नासंकेतः लाक्षणिके नाबोधकतामितिन तेयोः प्रभेदः। यथा। सीमंते दिव्यधूमा सप्ताद्य
दधती वारुशि कूटयोऽभात् कुर्वंति केलीकिसलं चरचना येन कण्ठे वधूनां। खिद्यत्सी कियला सारस्यमि सुवती मिन्नु
श्रीवाञ्चरे सान्द्रोत्कलाङ्गा यारद्पाजा ओ गदिदमविललीपमवैधो न वीना। अत्र ज्योत्स्नापदं बालातपस्याचाचकं। नचेदं तास्य
ध्वनिरुपपदत्वाल्लक्षणायाबोधकं भवितुं शक्यमिति वाच्यं। यत्र न प्रयोजनं प्रतिपिपादयिषितं तत्र लक्षणाया अनवतारात् हेतुश्चेभ
त्रावयवस्य रूढत्वात्। भीत भीसेकं दधाकम्पं पशुभिर्भवं कोपयालात पश्नो रीति ठुष्णुके। अश्लीलं। यस्य प्रकाशमात्रेणा
सभ्यार्थस्य निर्णयः। ग्रामत्रुगुसार्हेत कल्प यं जुकौ नितिवि भेत्य त्तौ। ग्राम्येयमनास्था र्थसारकतं कितु स्याद् एतद्धीनार्थहि
भ्य। न। व्यत्ययानुशासनविरोधेन लक्षणाहि

अन्न १ दोषक २ ३ दोष

सायकोऽम्बुजसन्निभः। सहेलं गाथोअसिंधीरस्य स.सहस्रगुः। इत्यत्र वेसर्पः। सायकः करवालः। यत्र सायकोपमा तुर्य्यमुत्प्रेक्षा
सामग्रीवांतस्यप्रागुक्तप्रतीतिः। यत्र च विवक्षयो गोविन्दे विलक्षणसामग्रीकैवातस्यापि तत्वेन प्रतीतिर्भिन्नप्रकृते पिनथा। अत्र
चातात्पर्यविषयीभूतप्रतीतिकृतप्रकृतप्रतीतिविलक्षणरूपकतादीनां। केचित्तु प्रकृतानान्वितपरार्थयोपस्थि
तिर्भ्रांतिसंधाने रूपकतादीनामिति त्याज्यः॥ विकल्पार्थसमासोक्तिमनोविपत्यार्थतां गतं। तदर्थोपि च अप्रकर्षविनुपादीयमान
स्यानकर्षबोधकत्वप्रतिपादनं। तत्र चर्चायस्य करवेधः। क्रमेण यथा। यथा। सहस्रत्वगतः सवोधवसकलभद्रसस्तुतस
हानुजः। सबले नानिहीनः सन्युगेनाधिनास्योऽयुधुलः सुयोधनः। अत्र युधोधनोस्तोत्कर्षप्रतिपादनतात्पर्यकाया अदस
तुविनार्थः। तथा वा। उग्निष्ठस्वारतोते भरमुरगपतोपानितौ केन कृत्वा कृत्वा वाम्येन वालो विलुलितकवरीभारमंसे वहं
त्या। भूयस्तत्कालकीर्तिस्फुरितमुरलशीतिनारोरत्नाद्यः शय्यामालिंग्य नीतं वपुरलसलसद्बाहुलक्ष्म्याः पुनातु॥ इत्यस्य
देवताविषयकरतिवर्णने तु विस्तार्यत्वं॥ अनेकवैकांग्रकोषो तद्वर्णने हि पीतांबरः सुरतवर्णनमेवेति। केचित्तु उत्कृष्टत्व
पकर्षबोधकत्वमपकृष्टस्योत्कर्षबोधकत्वमुभयमप्यनुविनार्थत्वं। आद्ये यथा। वह्निस्फुलिंग इव भानुरयं चकास्ति। अप
रे यथा। अर्थेयमासनासीनस्य कुंभकोविराजते। पुनादोभगवान्वेधा विनिर्मिसुरिवप्रजाः। अत्रोत्कृष्टस्य सूर्यस्यापक

कर्षोत्कर्ष २

गता १ यो यो धूमवान्स सोऽग्निमान् यथा महानसः १

वह्निमान् धूमात् यत्र यत्र धूमस्तत्र तत्र वह्निः वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमानयमिति सांप्रदायिकं पंचावयवप्रयोगः।
तत्र पर्वतो वह्निः धूमोऽयं ततः वह्निव्याप्तिः धूमे धूमे न च पर्वते भवितव्यं पर्वता धर्षो वह्निरित्येतावद्दश प्रयोग कारा। लिङ्गस्य
तेऽस्तिस्त्वर्थ लिङ्गं। तत्र बीजं संप्रत्ययस्तु लक्षणं ध्यकिमर्थमनेन प्रयुक्तमिति तात्पर्यान्वेषणतो दोलायमानबुद्धिर्न प्रकृतार्थप
र्यवसितो भवति तद्दूषकापि लाभ प्रक्रिया नोधीरित्यवधेयं। उपसर्गं विना तस्याद्योधितार्थस्य बोधकं। धातुपाठस्य तुल्यत्वेऽप्य
समर्थं तदुच्यते। एतदर्थो पि तात्पर्यविषयीभूतार्थबोधनानुकूलशक्तिरहितपदत्वं लक्षणं। यथा तीर्थं तदेकुत्स्ना
नेन समुपार्जितसत्क्रियः। कुरुक्षे तस्मिमावे यहं तिसं प्रतिसादरं। अत्र हं सीतिगम्यमानार्थं ऽप्रतिपद्यते। सप्तसु
संदानेनोभयार्थबोधकत्वेन नोभयार्थकधातुपाठैकत्वं। संबोधितावच्छेदकप्रकारत्वानाभावद्वदूषकतावीजम्॥
यथाऽपसर्गं तनं विना गमनबोधं प्रतिलक्ष्यापो ग्यत्वं दूषकतावीजं। अनर्थकत्वम्। अस्य परमसामर्थ्यं धातोर्यत्य्यच्यतेन
इत्थं तो। नयनाक्षोति तमर्थं गमनं यथाहं सितिरिति। यच्चबोधसंदानं विनाधिगमनार्थे बोधस्ते प्रतिनायदो च्चडत्यवधे
यं। अप्रसिद्धार्थबोधायप्रसिद्धार्थमित्युच्यते। उभयार्थकमयेत इदंतिलिङ्गितार्थकं। तत्तु अनात्पर्यविषयार्थप्रती
त्याक्षिप्ततात्पर्यविषयार्थकपदत्वं लक्षणं। यथा सहलग्नो रिवाबीजं उत्साहेनयतः परेः। तवकृत्स्नविभात्वे घ

६ कांतिः

मेव८

ति
न

हे८
न२

एवं कटाक्ष। यथा। अस्पृष्टुस्त्रीडि कपोलयोर्ले कौ निद्रवं ओणिस्त्र दृशांतीकः। यथा वा। अयादितीक ननकपत्रसमानयलम्बु
त्तुंगक कृशकुचार्पितचारुहारी। कौ वीमिये भिन्ननितं वतिशालर्दिवा मुद्दामनूपुरवलयस्स्तोस्पराशि। रूपक ता वी अंशा
त्रभ्रांतिवधकधर्मसत्वा इसो बोधप्रतिवध एवेति। भिदितेनगादृशात्स्येयम्नदसाधुस्त्वंतथया। अत्राह योगादर्वि दनाभ्ये शशीभोऽस्मि
राजराटतदादिवाप। मुखादिवाणक्कनयोर्विधानुःमुखाम्रिस्पृष्टुर्म्बभुजिम्हाजन्म॥ यथा वा। कल्पातिपातिपतितानिधि
नाथिवारमेतानिमो कुशुर्विसानिजन्ते स्फिकानि। शुंजे तिसंजयतेयाद कुअमं ते इत्तोशिर्दि दनवनी स्पलयो ऽत्र भेवा अ
वारिधि रनाभ्ये इतिस्सजनयन्ते इतिपर्दद्वयमसाधु। यस्कत्तत्त्व। अत्रासाधुत्वं ज्ञानाद न्वयबोधस्थगनमेव रूपकमावीजं। त
त्तु नघटते। साधु शब्दस्मरणादिनांप्राप्ति भ्रमा स्वल्पेदवा अन्वयबोधात्। किंत्र सुराविलंवस्याकिंचित्करत्वात्। अतएव भा
षामात्रस्थूकाव्यत्वं घटते। आन्मानमपि कोशेनुनालंकारिकसंमतं। यस्त्वदं कुकवित्रो स्मै तदसंमतमस्तु उच्यते। यथार्थ दारु
णा सारः सर्वदेवविभाव्यते। तथामन्ये देवतोद्युपिनाको मन्दसोथ वा। ननु कथमत्र रूपकता। तस्मनुशासनसिद्धत्वे
शाद्दसामस्य्याः परिह्लर्तलेन तीद्लंवेसानाभावात्। कृविसेत्रपाय अस्तु स्मस्वैक्रमस्याहेतुत्वात्। नहि शाब्दबोधे तदस्य
त्तलीये। गौरवान्माना नाभाषा धर्मिपांतदाम्रतिचेत्। उच्यते। अत्र तस्मतीतिस्थगनमत्र रूपकमावीजं। तथाहि कुआर्या पर्वता

दि७ क०२

[illegible] स्य चैतन्य ३ आवरणस्य ३

॥अवसरसंगत्या दोषस्वरूपमाह। येषां ज्ञानाच्चमत्कारो न सम्यगुपजायते। सालंकारेष्वपि त्वत्र ते दोषाः परिकी-
र्तिताः। दृष्टो हि लोके सगुणोऽपि सालंकारोऽपि सदोषत्वेन ज्ञातो न तथा चमत्करोति तथा काव्यमपि। वस्तुतस्तु
रसापकर्षजनकज्ञानविषयत्वं दोषत्वं। अपकर्षश्च रसाद्युत्कर्षविघ्नः स्थाने दोषो लेशेनापि स्थितिः॥ ननु च्युतसं-
स्कृत्यादिष्वव्याप्तिः। न ज्ञानस्य रसादृष्टौ प्रतिबंधकतया रसापकर्षजनकज्ञानविषयत्वाभावात्। उक्तं विस्ते-
सोऽकवेर्भासा [illegible] इत्यादिवाक्ये [illegible] काव्यत्वादिति चेन्न। न ज्ञानस्यापि प्रतिबं-
धकत्वमित्येके। वस्तुतस्तु तस्या दोषत्वं [illegible] लेः। अथ [illegible] माह। श्रुतिक-
टु च्युतसंस्कृत्यप्रयुक्तमसमर्थं। निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलं संदिग्ध-
मप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम्। अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव। श्रुतिकटु पददु-
ष्टमिति संबंधः। [illegible]। निष्ठुराक्षरमयोऽत्र [illegible] श्रुतिकटु [illegible]तम्। [illegible] वस्तुतस्तु श्रुत्यप-
कर्षकत्वे सति [illegible] तत्व। [illegible] तथा [illegible] ग्रसंगधारकाय [illegible]। [illegible]
वर्णना [illegible]। [illegible] तथा [illegible]। [illegible]

बाध्य ५

वा ३

धीरैः कोल्लुरित्यभिधीयते। तेन वाच्यवक्रोक्तिस्तु पल्लवितं। यथा। मध्नामिकोरववशात्समरे न कोपा
दुःशासनस्यरुधिरं नपिबाम्युरस्तः। संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु भवतां नृपतिः पणे
न। अस्तुं दरं चमत्कारेवाच्यमुखनिरीक्षकं यथा। गहरविरतो मध्ये हस्तो तैपरेण वाकिन्तुतसक
लेयातेषाहि प्रिय त्वमेहैयाधि। इतिदिन शत प्राप्यं। देशं प्रियस्यधियासतो हरतिगमनं बालाला
पैःसंगलज्जलै॥ अत्रो केगध्वनिः सबाष्पगलज्जलैरित्यादिवाच्यमुखनिरीक्षकः। प्रायोवा वा
प्रपंचे न भयात्येषा प्रपंचिता। गुणी भूतभिदातस्मादस्मा कं ध्वनिसंभिता॥ वस्तुतस्तु। सैक
लनेनान्यस्य ध्वनेस्त्रयो भेदः। व्यंग्यस्यत्रिरूपत्वात्। तथाहि। किंचिद्वाच्यतां सहते। किंचित्वन्य
था। तत्र वाच्यतां सहं वस्त्वलंकार रूपं। रसादिलक्षणस्त्वर्थः स्वप्नेपिन वाच्यः। सहिरसादिल

सकलमास्य २

३४

३४

पि

४०

न्यो:५

सेतिपयोदसुहृदामिति व्यापनेपरितोषकारित्वे लक्ष्ये। इत्यत्रात्यंततिरस्कृतवाच्ययोः व्यापन
त्वातिशयपरितोषकारित्वातिशयध्वन्योः संसृष्टिः। आभ्यां सह रामोस्मीत्यस्यार्थांतरे दुःखसहि
ष्णुत्वरूपे संक्रमितवाच्यस्य तादृशावेव्यंग्यहेतु संपातोपि जीवित्वरूपदुःखसहनातिशय
ध्वनेरनुग्राह्यानुग्राहकभावेन रामपदलक्षणैकव्यंजकानुप्रवेशेन चार्थांतरसंक्रमितवा
च्यस्य दुःखसहनातिशयध्वनेरसध्वनेश्च संकरः। एवमन्यदुदाहार्यं। ॥इति श्री विश्वनाथदे
वविरचिते साहित्यसुधासिंधौ तृतीयस्तरंगः॥ ॥अथ प्रायो गुणीभूतव्यंग्यभेदानाह॥ अ
गूढमपरस्यांगं वाच्यसिध्यंगमस्फुटं। संदिग्धतुल्यप्राधान्यं काक्वाक्षिप्तमसुंदरं। व्यंग्यमेवं
गुणीभूतं व्यंग्यस्याष्टौ भिदा मताः। अगूढमिति। सहृदयाहृदयसंवेद्यत्वमितियावत्। त
थाच नैमलाप्रकर्षः। उक्तं च। नांध्रीपयोधर इवातितरां प्रकाशो नो गुर्जरीस्तन इवाति

च१ स२

३२

नतुस्कै तरतेन। शृंगाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः। बीभत्सदर्शने ... भयानकः॥ शृंगारानुकृतिर्या तु स हास्य इति संज्ञितः। रौद्रस्यैव तु यत्कर्म ज्ञेयः स करुणो रसः॥ बीभत्सदर्शनं यच्च ज्ञेयः स तु भयानकः॥ उत्साहोऽयत्नवीरस्य सोऽद्भुत इति संज्ञितः। २
भाव. २

तरां निगूढः। अर्थो गिरामपिहितः पिहितश्च कश्चित् सौभाग्यमेति मरहट्टवधूकुचाभः॥ अनुरूप
यथा। अवश्यं भाविभावानां प्रतीकारो भवेद्यदि। तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः॥ अत्राव
श्यंभाविभवत्येवेति काव्यस्य प्रतीयते। अपरस्य रसादेः रसादिरंगमुत्कर्षकं तथा वाच्यस्यानुरण
नरूपमंगं। केचित्तु वाच्यस्यापि राज्ञोऽनुगतत्वे ... वेंरसादिरंगं। आदिपदग्राह्यं भावादि। य
था। नयनान्यरुणानि घूर्णयन्वचनानि स्खलयन्पदे पदे। असति त्वयि वारुणीमदः प्रमदानाम
धुना विडंबना। अत्र शृंगारोचितनयनघूर्णनादिजनकमदिरारसस्मरणादुल्लासस्मरणा
द्विगलद्धृदयत्वाच्छोकावेगमधिकं जनयन्तीति रसादेः रसादिरंगं। भावस्याप्यंगत्वे यथा॥
सर्वत्र नो वार्त्तमवेहि राजन् नाथे कुतस्त्वय्यशुभं प्रजानां। सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोक
स्य कथं तमिस्रा। अत्र सूर्यविषयको भावो राजविषयकभावस्य। अनुरणनरूपस्यालंकारस्य

स्या ३
विवाक्य
इत्त ४

द्वा यस्या
पि ४

वाच्यांगत्वं। यथा। स्फुली जातः कदशनवशा ज्झेक्ष्यवर्ष्यान्तिकपाली वस्त्राभावा फणिनवसनस्तैलदो
षाजकटावान्द। इत्थं भूतस्त्वदभिसरणाणदीश्वरत्वं मयाप्तमेघार्धित्वं नधिनरपतेनार्द्धचंद्रद्रष्टासि॥
अत्र वाच्यस्य शोकत्वारोपस्य शब्दशक्तिमूलेनीयमानमीश्वरेण सह साम्यमुत्कर्षकं। अनुरणनरूप
स्य वस्तुनो वाच्यांगत्वोदाहरणं स्वयमूहनीयं। वाच्यस्य रसादिरंगं यथा। आगत्य संप्रति वियोगविसं
ष्टुलांगीमंभोजिनी कचिदपि क्षपितत्रियामा। एतां प्रसादयति पश्य शनैः प्रभाते तन्वंगि पादपत
नेन सहस्ररश्मिः॥ अत्र खंडितानुनयं लक्षणनायकवृत्तांततादात्म्यावगमादिष्ट रतिरूपेण र
सेन वाच्यस्य रविकमलिनीवृत्तांतस्योत्कर्षणाभिमितिरसस्य वाच्यांगतेति। वाच्यस्य वाक्यार्थस्याप्यु
पपद्यमानस्य क्षितिरूपपत्तिस्तस्यांगं भिदा न वाच्यासिद्ध्यंगं। यथा। गाढगुरुत्सो लंबो मधुपे
त्यादि। अस्फुटं सहृदयैरपि कष्टं त्यसंवेद्यं। यथा। पत्रावली विरच कपोलपालिं जातः सपत्नीमव

नध्यमनेतु। असंलक्ष्यक्रमः संलक्ष्यक्रमश्चेत्यादिभेदद्वयम्। असंलक्ष्यक्रमस्त्वजहत्स्वा
र्थजहत्स्वार्थाभिधामूलभेदाच्चतुर्विधः। तथाचार्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृत
वाच्यात्मभेदद्वयमतिरिक्तमिति निर्विंशः॥ संलक्ष्यक्रमस्तु शब्दशक्त्युद्भवोऽर्थशक्त्युद्भ
वश्शब्दार्थशक्त्युद्भवस्त्वभिधायामेवोक्तरीत्या लक्षणायामप्यलंकारवस्तुरूपः
अर्थशक्त्युद्भवोपि स्वतःसंभवी कविप्रौढोक्तिनिष्पन्नात्मोपाधिभेदेनाष्टविधोऽप्यभि
धायामेव अजहत्स्वार्थायामजहत्स्वार्थायामिति चतुर्विंशतिभेदः। कविनिबद्धव
क्तृप्रौढोक्तिनिष्पन्नात्मोपाधिभेदेनैर्विंशः। एकः शब्दार्थोभयमूलः। प्रबंधस्यव्यंज
कत्वेनातिरिक्ताभेदास्तस्माच्चतुर्विंशतिभेदाः ध्वोर्दशमा इति मदेकदृष्टः पंथाः॥
एकान्नेशास्य श्रीकण्ठस्य प्रथमपंक्तिकायाः शोधपत्रम्॥

अर्थान्तरसंक्रमितवाच्यासंलक्ष्यक्रमव्यङ्ग्योऽत्यन्ततिरस्कृतवाच्यासंलक्ष्यक्रमश्चेति १
अकृतानुपयोगा
यादृत्येतमनुपयुक्तत्वाच्चनेह प्रदर्शितौ। वस्तुतस्तु अविवक्षितवाच्यस्य भेदद्वयोः रकोरसादिः)
लक्ष्यक्रमस्य शब्दशक्तिमूलार्थशक्तिमूलौ अलंकारतदन्यवस्तुरूपौ द्वौ॥ अर्थशक्तिर्द्विविधः। स्व
तःसंभवी प्रौढोक्तिमात्रनिष्पन्नश्चेति। अन्यत्तु सर्वस्वबुद्धिसौष्ठववशकल्पनं। तत्र स्वतःसंभ
वी अर्थो यथा। आयाताशिशिरर्तुरेव पथिकं दृष्ट्वा सिके नापि नो नीलैर्वा लमनुं चमुंचह र
तुस्वेदं नितरीथानिलः। पुष्पांतं गयसन्त्रकेठमसकृ घाम)ति तल्पं गतातस्पैतीपरिरम्य तेसु
कृतिभिः स्वैरं नवस्त्रैरली॥ प्रौढोक्तिनिष्पन्नो यथा। कैलासः भाक्षूरीरं फणफलकहुडु
यामूली ओगराजः प्रथाक्रं पस्यसोर्यं तवं ऊयानियशोराशिं राशी। विभेदः।) वसेऊस्तु छि
हाने विधिरपचराविं प्रोंछतिव्यर्थमानी। जानीमस्ताव कीनासमसमरसमुकूनधूलीस
नक्षूलि १

वा क्रमिस्तु ध्वन्यते ते ध्वे तल्लिंगमजातेतुयः। विशेषणात्त्वभावम्॥

वे:

प्रार्थीमते२

स्तु ध्वन्यते। अर्थशक्त्युद्भवोऽप्यर्थो व्यंजकः संभवी स्वतः। प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भितस्य वा॥ स्तु

वस्तु वालंकृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत्। वस्त्वलंकारमथवा तेनायं द्वादशात्मकः। तदयं विवक्षित-)

अविवक्षितवाच्यस्य द्वौ भेदौ अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यो। विवक्षितान्यपर-

ध्य० ८ — वाच्यस्याऽसंलक्ष्यक्रमो रसादिरेको भेदः॥ तस्यैव संलक्ष्यक्रमस्य शब्दशक्तिमूलौ अलंकारवस्तु-

ध्वनि: ५ — ध्वनी। अर्थशक्त्युद्भवस्य द्वादश। एकः शब्दार्थोभयभूः। इत्थमष्टादश वाक्यस्य व्यंजकत्वे भेदाः

पदस्य व्यंजकत्वेऽत्यन्तशक्त्युद्भवध्वन्यभावात् सप्तदश॥ इति पंचत्रिंशत्॥ प्रबंधे चार्थशक्त्युद्-

भवस्य द्वादश भेदाः॥ इति सप्तचत्वारिंशद्भेदाः॥ असंलक्ष्यक्रमस्य प्रबंधपदैकदेशरचनावर्णानां

व्यंजकत्वे चत्वारो भेदास्तस्माद्युक्ता एकपंचाशत्॥ ध्वनिरुदाहरणं स्वयमूहनीयं ग्रंथगौरवभ-

सं २ भेदाः१ वर्ण२

स्युद्भवः

रिकीर्तितः। शब्दार्थोभयभूस्तस्मात्त्रिविधः कथ्यते बुधैः। वस्त्वलंकृति ध्वन्योः क्रमः संलक्ष्यते रसभा
वादिषु क्रमो न संलक्ष्यत इत्यत्र सामाजिका एव प्रष्टव्याः।। संलक्ष्यक्रमः शब्दशक्त्युद्भवोऽर्थशक्त्यु
द्भवो उभयशक्तिमूलश्चेति त्रिविधः। यत्र शब्दाः परिवृत्तिं न सहन्ते स शब्दशक्त्युद्भवः। तदन्योऽर्थश
क्त्युद्भवः। यत्र परिवृत्त्यपरिवृत्तिश्च शब्दानां स उभयशक्तिमूलः। तत्रालंकारोथवस्त्वेव शब्दाद्यत्राव
भासते। प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो ध्वनिः। यथा। विज्ञालेरणावत्त्वरा दृशिगणे त्रस्तोस
मस्तेपुनः कोपात्कोपि निवर्त्तते यदिभटः कोस्यात्रिगत्युद्भटः। आगच्छन्त्यपि संमुखं विमुखता
मेवाधिगच्छत्यसौ ज्ञातं तद्धुरि कारयेणठणितानिहन्तापसर्पच्छिराः। अत्र शब्दशक्त्युद्भवो विरो
धाभासः। वस्तुमात्रं यथा। शनिरशनिश्च तमुच्चैर्निहंति कुप्यसि नरेंद्र यस्मै त्वं। यत्र प्रसी
दसि पुनः स भात्युदारोऽनुदारश्च। अत्र विरुद्धावपि त्वदनुवर्त्तनार्थमेकं कार्यं कुरुत इति व

३० ३०

द्रव्यापारवैमुख्यमिंद्रियाणां श्रमादिभिः॥ तथा। मत्तेभकुंभपरिणाहिनि कुंकुमार्द्रे कांतापयो
धरयुगे रतिखेदखिन्नः। वक्षो निधाय भुजपंजरमध्यवर्ती धन्यः क्षपां क्षपयति क्षणलब्धनिद्रः॥
निद्रादिजनितं सुप्तमिंद्रियाणां निमीलनं। यथा। प्रहरकमपनीय स्वं निनिद्रासतोच्चैः प्रतिपदमु
पहूतः केनचिज्जागृहीति। मुहुरविशदवर्णां निद्रयाशून्यशून्यां दददँगिरमंतर्बुध्यते नो मनुष्यः॥ ददपि
यथावा। यत्रैव तत्रैव यथा तथैव येनैव तेनैव च कृतोपधानाः। दुकूलतल्पेपि च वल्कलेषु सुखेन
निद्रांति निर्वृतवृत्त्याः। निद्रापगमहेतुभ्यः प्रबोधश्चेतनागमः। यथा। इति विरचितवाग्भिर्बं
दिपुत्रैः कुमारः सपदि विगतनिद्रस्तल्पमुज्झांचकार॥ मदपटुनिनदद्भिर्बोधितो राजहंसैः सुर
गज इव गांगं सैकतं सुप्रतीकः। उक्ता भावा विभेदेन तेभी रत्यादयो रसाः॥ रसाभासादीना
मुदाहरणानि। स्वयमूह्यानि। अयं चासंलक्ष्यक्रमः॥ वाच्यव्यंग्यक्रमज्ञानां ध्वनिर्यः प

मिहामिभुंच

सं१ मलमतिमात्रं साहसेनामुना तेत्वरितं त्वं लतापाशमेनं। सपदि समधिनिरोद्धुं जीवितं जीवितेशे क्षणमिह मम

चिर कंठे बाहुपाशं निधेहि॥ मनःशरीरयोः खेदः क्रियातिशयतः श्रमः। यथा। स्खलयति वचनं ते संश्रयत्यं

४५ गमंगं जनयति मुखचंद्रोद्भासिनः स्वेदबिंदून्। मुकुलयति च नेत्रे सर्वथा सुभ्रु खेदस्त्वयि विलसति तु

ल्यं वल्लभालोकनेन॥ विनस्वरखेदादि निर्वेदस्तत्वज्ञानेष्ट्यादिभिः। यथा। जरामरणादेर्मर्त्यस्याध्य

२९ स्तावदासतौ। नध्यंन्ये अन्मेव चीशरणं। भूयो भूयस्त्रपाकरं। क्रिपास्त्वपार्वं जाड्यं चिंतोत्कंगर्भयादि

भिः॥ यथा। ननमाधिनु माधिज्यमस्मिशक्तो धनुरिष्माहितसायकं मृगेषु। सहस वसतिमुपेत्यपेयैः प्रिया

याः कृतइव मुग्धविलोकितोपदेशः॥ क्रियाविद्वेष आलस्यं सुखसंगमदादिभिः। यथा। स्फुरन्तिमाट

लतेत्र पालिविगलन्मुक्ताबलि भ्रूस्खलन्नैरेयस्तनस्य क्षिलिकणदलि व्याद्दष्ट दंतछद। सौलो द्वीउ

ल्य नरिखेलरेव निहलव्यालीढि दोर्वल्लरि भ्रश्यत्कुंतलिलोलकुंडलि तु मस्तालीकमाधं मम हः॥ नि

x यथावा। अप्यपधि शिथिलायामेधिलेशोद्रवायास्तरुणतरणिभासामस्ममाभाखीविकारः। अनुगतरयरेवा

x स्तानयातानुकूले तालमिह तरुमूले धाम्नवासो विधेयः॥ यथावा। अलसललितमुग्धान्यध्वसंतापखेदा

x दशिथिलपरिरंभैर्दत्तसंवाहनानि। मृदुमृदितम्टणालीदुर्बलान्यंगकानि त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता

भूपत्र५ २९

दं

ये५
जो

भविष्यति ॥ विरहादेर्मनस्तापः शारीरो तैकरोगदः ॥ यथा । स्थितस्तु रसि विशालं पद्मिनीपत्रमेतत्तक
थयति न तथांतर्मन्मथोत्थामवस्थां । अतिशयपरितापग्लापितांग्याय थास्याः स्तनभरपरिणाहमंड
लार्थी ब्रवीति ॥ यथा वा । निश्वासेषु स्ववल्लितिकदलीवीजनैं तापसंपन्नेत्रां नोभिः स्नेहोभिंतिपतितैः स्म स्छुनि२
ते तत्स्तनोत्तः । तस्याः किं विसुभगतद्भुतोनवत्वे विद्योगाधेना कस्माद्वलयपदवीमंगुलीयं प्रयाति ॥
वलस्यापर्ययोग्ला ॥ निराधिव्याधिमकर्षकः । यथा । किसलयमिव मुग्धं बंधनाद्विप्रलूनं हृदयकुसुमशो
षी दारुणो दीर्घशोकः । ग्लपयति परिपांडु क्षाममस्याः शरीरं शरदिज इव घर्मः केतकीगर्भपत्रम् ॥
उत्कंठा हर्षशोकादेरुन्मादश्चित्तविप्लवः । यथा । किं विद्वन्किं करोति हासमसकृन्निष्प्राणि संतिष्ठते बो
ध्यं स्तुवीति किं वरोपकलितः शोणां विधत्ते दृशाम् । बालेयं तिप्रेगमत्यकांडकुपिते स्यामाषते निष्ठुरे स्याहि
गत्यकुलां सममन्मथशरे जातिः परां दुर्दशाम् ॥ आदरातिशयाद्येतस्यां वेगः संभ्रमो मतः ॥ यथा । अत
मुग्धाक्षीति न२

परिग्रहक्षमायदायमस्या अभिलाषिमेमनः। सतांहिसंदेहपदेषुवस्तुषुप्रमाणमंतःकरणस्यवृत्तयः॥
निंदात्मनःपरावज्ञागर्वोऽसूयादिकृद्भवेत्। यथा। धृतायुधोयावदहंतावदन्यैःकिमायुधैः। यद्वानसिद्धमस्त्रे
णममतत्केनसेत्स्यति। अहेतुःपक्षपातोयःसस्नेहःकथितोबुधैः॥ यथा। अनेनकस्यापिकुलांकुरेणस्पृष्टे
नगात्रेषुसुखंममैतत्। कांनिर्वृतिंचेतसितस्यकुर्याद्यस्यायमंगात्कृतिनःप्ररूढः॥ अभीष्टार्थस्यसंप्राप्तौ
स्पृहापर्याप्तताधृतिः। यथा। सौरीराज्येसपादंविहितंकांतयासार्द्धमुच्चैर्देवीहृष्टाप्येजनिर्भागिनीलाभमा
साद्यसद्यः। स्फीताकीर्त्तिःसपदिरचिताचंद्रवंशस्यतस्मात् कस्मिन्निष्टेपुनरपिसखेकर्त्तुमीहातवास्ते॥
चेतोनिमीलनंव्रीडावैवर्ण्याधोमुखत्वकृत्। दृश्यतेक्वापिदैवेयमनुरागस्तवादिभिः। यथा। दिल्लीशोधारदेशो
नमधिगजपतिस्त्वत्पुरस्तादुपास्तेगौडेंद्रोनम्रमूर्त्तिर्दनुजनरपतिर्गुर्जराधीश्वरोपि। कृत्वैवंवैदिदृक्षंतवन
तववदनोगौरवंतत्रकुर्वन्भूवीरभ्रूवीरभानोरचयसिपुलकंवीरलक्ष्मीकपोले। अवहित्थंतुलज्जाद्यै

द२

हर्षाद्याकारगोपनं । यथा । एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी । लीलाकमलपत्राणि गणयामास पार्वती ॥ दुः
खदुःखादिजनितो मोहश्चित्तस्य मूढता । यथा । कान्ते तल्पमुपागते विगलिता नीवी स्वयं बंधनाद्वासो विश्लथमेख
लागुणधृतं किंचिन्नितंबे स्थितं । एतावत्सखि वेद्मि सांप्रतमहं तस्यांगसंगे पुनः कोसौ कास्मि रतं तु किं कथ
मिति स्वल्पापि मे न स्मृतिः । संमोहानंदसंभेदो मादिरादिकृतो मदः । यथा । अर्धं गम्येति गद्गदितवसादिरुध
रा नेयमिस्तु दृशौ धैर्यः कालिंदीकोपवेगाकलितहलहतेस्तोधियाः क्षेमहेतुः । तालांकस्यास्तु हालारसविव
शहृदः संसदंसोत्तरीयं तिर्यक्त्रस्तौ भ्रमूयं स्खलितमयलघुच्छोन भाधावनं तत् । मनःप्रसादो हर्षः स्या
दिष्टावाप्तिस्तवादिभिः । यथा । राज्यं निर्जितशत्रुयोग्यसचिवे न्यस्तः समस्तो भरः सम्यक्पालनलालि
ताः प्रशमिताः शेषोपसर्गाः प्रजाः । प्रद्योतस्य सुता वसंतसमयस्त्वं चेति नाम्ना धृतिं कामः काममुपैत्वयं म
म पुनर्मन्ये महानुत्सवः ॥ क्रोधः कृतापराधेषु चित्तरागप्रतिभञ्ज्कते । यथा । लाक्षागृहानलविषान्नसभा
प्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य । आकृष्टपाण्डववधूपरिधानकेशाः स्वस्था भवन्ति मयि जीवति

भार्त्तराद्याः। यथावा। तस्मेदुःप्रतिपन्तिस्राभितहृदायेनेवदन्तो मणिः सेवूर्णं करवालिचंडमहसेस्तस्याप्य
तेमंडलं। भित्त्वा शक्रसुसंतं विपक्षफलवन्नूष्मास्मभूमौ तले किं नाछिन्नमहो चराचरमिदं निर्वासरवर्त्ततां
असूयान्यगुणर्द्धीनां मोद्धत्यादसहिष्णुता। यथा। निर्वीर्य्यं गुरुशापभाषितवशात् किं मे तवैवायुधं संप्रत्ये
वभयाद्विहायसमरं प्राप्तोस्मि किं त्वं यथा। जातोहं स्तुतिवंशकीर्त्तनविदां किं सारथीनां कुले क्षुद्रारातिकृ
ताप्रियं प्रतिकरोम्यस्त्रेण नास्त्रेण किम्। सपत्नीसंगते कांते कोप ईर्ष्यासमुद्भवः। यथा। वक्षोजचिह्नि
तमुरो दयितस्य वीक्ष्य दीर्घानिलं श्वसिति जल्पति नैव किंचित्। प्रातर्ज्जलेन वदनं परिमार्जयंती बा
लाविलोचनजलौं नितरोदधाति। विषादश्चेतसो ग्लानिरभीष्टविरहादिभिः। यथा। कथं नु तं बंधुर
कोमलांगुलिं करं विहाय आसिनिमग्नमं भासि। अचेतनं नाम गुणं न लक्षये मयैव कस्मादवधीरिता
प्रिया। सत्वत्यागादुत्कर्षो वाक्यादेर्दैन्यमुच्यते। यथा। वृद्धोयं पतिरेष मंचकगतः स्थूणावशेषं गृहं

कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य वार्तापि नो यत्नात्संचिततैलबिंदुघटिका भग्नेति पर्याकुला दृष्ट्वा गर्भ
भरालसां निजवधूं श्वश्रूश्चिरं रोदिति। यथा वा जातिप्रीतिर्मनसि न कृता क्षत्रियाणां न धर्मो रूढं सख्यं तद
पि न गणितं नानुजस्यापरद्धं। तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबंधः कोऽयं पंथाः स पदि विमुखो मंदभा
ग्यो मयीत्थं।। अधिक्षेपाऽर्थं नादेशे च तच्छंडत्वमुच्यते। यथा। कृत्वा त्रिःसप्तकृत्वः सभीतिविशसनं पूर्वमुर्वीपती
नां कृत्वान्यत्सप्तकृत्वः पुनरपि कदनं दुर्मदानां नृपाणां। निर्माय क्ष्मापतीनां प्रतिसमरहते रुक्समेरुच्च
मौर्गैः कापाली मस्समालीं धारयति भगवतो भैरवस्याप्ययाभिः।। त्रासश्चित्तचमत्कारः आकस्मिकघनयादि
भिः। यथा। लंकाधामनि वीरभानुनृपतेः प्रेक्ष्य प्रतापोदयं प्रत्यागारमधीरनीरजदृशो भूयोऽकृताशङ्कमात्व। क्षुभ्य
द्वाणिविधूतपाणि विगलन्मुक्तावलिप्रस्खलद्बाष्पश्रोणिविलोलवेणिदयितकंठस्थले विभ्रांति। अनिष्टाभ्यागमो
त्प्रेक्षा शंका नाम वस्तते बुधाः।। यथा। आनीते तमया सीताधिकं नानीतं सुरद्विषः। स चेदायाति लंकायां न जाने किं

विधीन

२८

२८

तद्वाक्यं हृदयान्नापसर्प्पति। उक्तो वितर्कस्तु ऊहः पदार्थेषु यथामतिः। यथा। विधायापूर्वपूर्णेन्दुमस्या
मुखमभूद्ध्रुवम्। धाता निजासनांभोजविनिमीलनदुःस्थितः। उत्कंठेष्टानवाप्तौ योऽभिलाषः स्यात्तदा
भये। यथा। पुनरपि मिलनं यदा कदाचित्प्रियतमया कृपयाद्य वेधिषातुः। हरइव करवैनतोरभिन्नां
हारिरिव क्षितनवैतनुशांतिधाम्। प्रयत्नः सिद्धिकार्येषु स्यात्तात्पर्यं तदिति कथ्यते। यथा। आस्तां तावद्वचन
रचनाभाजनत्वं विदूरे दूरे चास्तां तव तनुपरीरंभसंभावनापि। भूयो भूयः प्रणतिभिरहो किंतु या
चे विधेयास्मारं स्मारं स्वजनगणने काधि रेखा मदीया॥ आत्मप्रकाशनपरा चेष्टा चपलतोच्य
ते। यथा। कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं। रजोभिरंतः परिवेषबंधि लीला
रविंदं भ्रमयांचकार। शास्त्रार्थानुसंधानादर्थनिर्द्धारणं मतिः। यथा। असंशयं क्षत्र

२८

गधा अयोडुःखावेशः। प्रलयस्तीव्रदुःखादेरिंद्रियास्तमयो मतः। यथा। तीव्राभिषंगप्रभवेन वृत्तिं मोहेन संस्तंभयतेंद्रियाणां। अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव। अत्र प्रलयशब्देन मूर्छोच्यते। न तु मरणमन्यथा। आलंबनोच्छेदेन सात्विकत्वानुपपत्तेः। अथ व्यभिचारिभावाः। स्मृतिर्धृतिर्वितर्कश्च शंकाचिंताचपलतामतिः। गर्वः स्नेहो धृतिर्व्रीडावाहित्थं मृदुतामदः। हर्षामर्षविस्मयेर्ष्याविषादा दैन्यमुग्रता। त्रासः शंकागदोग्लानिरुन्मादः संभ्रमश्रमः। निर्वेदो जाड्यमालस्यं निद्रा सुप्तं प्रबुद्धता। इति भावास्त्रयस्त्रिंशद्विज्ञेया व्यभिचारिणः॥ क्रमेण लक्षणोदाहरणानि। स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते। यथा। तल्ले त्रोत तरंगितं मृगदृशस्तत्कर्णकंडूयनं सावज्ञो रतिपरंपराप्रियसखीहस्तावलंबोपि सः। मानम्लो हृदयात्प्रयाति सहसाता बाष्परेफावली स्रंकारप्रणवोपदेशुरसिको नातो वसंतोत्सवः। यथा वा। सारध्यासपदन्यासस्तत्प्रावृत्सुवीक्षितम्। अन्योक्तिगर्भे

बोधं ५

स्वर्य्यं गद्गदं विदुः। यथा। भ्रमभ्रमति मेदिनी लललल्लीबते चंद्रमाः कृष्ण धव द्रुतं हह हस्तं लिकिंक्ष स्मयः। सिसीधुद द दे हि मे पपपपा न पात्रे मुकुमत्र दस्खलितमालपन्हरिधरः श्रियं स्तु वः क्रियात्। यथा वा। पिपप्रिय .सससस्वयं मुमुमुखासवं देहि मे तत त्यज दुंदु तं न भभभाजनं कांचनं। इति स्खलितजल्पितं मदवशात्कुरंगीदृशः प्रगे हसितहेतवे सहचरीभिरध्यैयत॥ रागरोषभयादिभ्यः कंपो गात्रस्य वेपथुः। यथा। मा वर्बुभुहु कपो लतलिचकास्ति कांतस्तहस्तलिखिता खलु मंजरीति। अन्यापि किं न सखि भाजनमीदृशीनां वैरी न चेद्भवति वेपथुरंतरायः॥ विषादमदरोषादेर्वर्णान्यत्वं विवर्णता। यथा। तथाविषादाभिनयादयं क्वचिज्जुगोप निःश्वासततिं वियोगजां। विलेपनस्याधिकचंद्रभागताविभावनाच्चापललाप पांडुतां॥ अश्रु नेत्रोद्भवं वारि दुःखशोकप्रहर्षजं। यथा। उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं बाष्पं कुरु स्थिरतया विरतानुबंधं। अस्मिन्नलक्षितनतोन्नतभूमिभागे मार्गे पदानि खलु ते विषमीभवंति। अत्र बाष्पशब्देन लोचनाश्रयमश्रुच्यते ने[illegible]

एतेन। रसे सारश्चमत्कारः सर्वत्रैवानुभूयते। तच्चमत्कारकारित्वे सर्वत्राप्यद्भुतो रसः। अतस्त्वद्भुतमेवाह कृती नारायणो
रस इत्यभाणि। तथाहि। विभावानुभावव्यभिचारिप्रतिपत्तये दिक्षाभिनी परस्परभेदात् चत्वारः स्त्रीकार्यर्णव
रिसु। एवं शान्तस्यापि वर्णनं मुमुक्षूणां वैराग्यातिशयप्राप्तये। एवं भयानकस्यापि वर्णनं तत्त्वद्यक्तीनां मार्दव
प्रतिपादनाय। वस्तुतस्तु कविभिः स्वशक्तिप्रदर्शनार्थमिव पद्यबंधादिनिर्माणवत् तत्र तत्र तत्तद्वर्ण्य
ते इत्युपरम्यते। सात्त्विकभावानाह। स्तंभः स्वेदोथ रोमांचः स्वरभंगोथ वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सा
त्त्विका मताः। क्रमेण लक्षणोदाहरणानि। स्तंभश्चेष्टाप्रतीघातो हर्षाश्चर्यभयादिभिः। यथा। तं वीक्ष्य वेपथुमती
सरसांगयष्टिर्निक्षेपणाय पदमुद्धृतमावहंती। मार्गाचलव्यतिकराकुलितेव सिंधुः शैलाधिराजतनया न ययौ
न तस्थौ। वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः। यथा। हिमव्यपायाद्विशदाधराणामापांडुरीभूतमुखच्छवी
नां। स्वेदोद्गमः किंपुरुषांगनानां चक्रे पदं पत्रविशेषकेषु। यथा वा। श्रीरेवापाणिरप्यस्याः पारिजातस्य पल्ल
वः। कुतोन्यथा स्रवत्येष स्वेदच्छद्माऽमृतद्रवम्॥ हर्षाद्भुतभयादिभ्यो रोमांचो रोमविक्रिया। यथा। सा बाढं
भगवत्यक्षिते ति निविडं संयम्य बाहोः स्वजा भूयो न स्पृशसीति गाढ निविडं संतर्ज्य संतर्ज्य च। आलीनांगुर
एवनिह्नुतिपरः कोपादृणं नूपुरं मानिन्या चरणप्रहारविधिना प्रेयान् प्रमोदीकृतः। मदभ्रमदपीडाद्दैवैं
निर्भर्त्स्य च २

त्या क्रु:।५

स्थित्या वांतनिष्ठीवनादिकं येन्नलभवेत्तदेवाश्चर्यं कुतः परमानंदरूपोरसो बोध इति । एवं भयेपि । तथा शांतस्य त्य
क्तसर्ववासनेषु कथं चिक्कवतुरसत्वं । विषयेषु तु नः सर्वविजयोपरमोपस्थित्या कथं रसत्वं । तदुक्तं । नयत्र दुःखं नसु
खं नचिन्ता नद्वेषरागौ नच काचिदिच्छा । रसः प्रशान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः । एवं रौद्रोप्यतो वी
रादभिन्नो । विभावादिसाम्यात् । नचस्थायी भेदकः तस्यापि नियामकमुख्यत्वे स्थितत्वात् । यत्तु रक्तास्यनेत्रता
रौद्रे युद्धवीरात्तु भेदिनी । तन्न । क्रोधसंचारिणि वीरे उक्तेव तथासंभवेन भेदकत्वानुपपत्तेः । नच विवेचकत्वा
दिभेदकमिति वाच्यं । क्रोधव्यभिचारिणि वीरादावपि अविवेचकत्वसंभवात् । एवं दानवीरादीनां भावत्वे
नैवगतार्थत्वम् । एवं दीनवात्सल्यौ न रसौ । भावत्वेनैव गतार्थत्वात् ॥ ननु कथं तर्ह्यजविलापादिकं करुणाभिव्य
ज्यत इति चेत् । उच्यते । अजमहीपप्रभृतीनां स्वस्वप्रियानुरागप्रकर्षप्रतिपत्त्यर्थं । अत एवाजमहीपतेरिंदुमतीमु
द्दिश्य देहत्यागोपि कालिदासेन वर्णितः । यथा । तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोर्देहत्यागादमर
गणनालेख्यमासाद्य सद्यः । पूर्वाकाराधिकचतुरया संगतः कांतया सौ लीलागारेष्वरमत पुनर्नंदनाभ्यंत

२४

तेषां

उच्यते। रौद्रशान्तयोस्तु जनितं वैक्लव्यं मनसो भयं सोपेक्षणादिभिर्गर्हा जुगुप्सेति निगद्यते। तत्त्वज्ञानापदीर्ष्याद
र्निर्वेदः स्वावमाननं। इत्यादिनोक्तशोकादिप्रकृतिकानां करुणादीनां रसत्वे विरोधात्। न च तेषां तथाभूत
त्वेप्यभिव्यक्तानां दांशाचिदात्मना सहाभिव्यक्तानां रसत्वमिति वाच्यम्। एवमपि स्थाय्यंशे रसत्वविरोधात्। अ
थालौकिकविभावाद्यभिव्यक्तानां तेषां रसत्वमुचितं सुरते दंतादिघातस्यास्वादत्ववदिति चेत्। एवं हि क्षुधा
पिपासादीनामपि दुःखहेतुजनितचेतोवैक्लव्यस्यापि रसान्तरत्वापत्तेः। सुरते दंतादिघातस्य बलवत्का
मसंभवदुःखनाशकत्वेन भारापगमे सुखिवनः संहृष्टास्मीतिवदुपादेयत्वं। किंच शोकादिहेतवस्तावत्पा
नैवविरोधिनः कथं परमानन्दरूपं रसं व्यंजयंतु। यत्तु शोकादयोपि रत्यादिवत्स्वप्रकाशज्ञानसुखात्मका
इति तदुन्मत्त प्रलपितम्। किंच सामाजिकेषु मृतकलत्रपुत्रादिकानां विभावादीनां शोकादिस्थायिभावस्य
चर्वणीयेनाज्ञमहीपालादिना सहसा पारस्पर्येऽश्रुपातादिदर्शनाच्च वर्णनीयतन्मयीभावनं चापेक्षितमिति कथं
ब्रह्मानन्दसहोदरो रसो शोकः कथं वा नाम गम्यो। अत एव केचित्करुणविलापादिकं न पठंति। बीभत्से तु जुगुप्सा चुप
शोकादिस्थायिभावादीनां २

म

विभ्रशो विदुर्वी तद्धि धैर्य्यमाकुर्मन्नी (छिण.)।५
ध्याय ३
पि भवतां स्नेहेनयापल्लवम्॥ आवेगः कुतुमगमस्त्वितिसमयेपस्याभवत्सुरसवःसेयंयातिशकुंतला
पतिगृहं सर्वैरनुज्ञाय तां। तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननं। यथा। धन्यानां गिरिकंदरे नि
वसतां ज्योतिः परं ध्यायतामानंदाश्रुजलं पिबंति शकुना निःशंकमंकेशयाः। अस्माकं तु मनोरथो
परिचितप्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते। वितर्कः स्मृतिचापुष्पभि शो
र्व्याडादिभिर्व्यंदां। आयत्ते विदुषामेषा वितुस्तविविवेचनं। यथा। आनीतैवमयासीता किं
नानीतं सुरद्विषः। सर्वे राघवाः तिलंकायां न जाने किं करिष्यति। निंदादितः परावज्ञा गर्वो २३
रूपादिकं कुर्वीत। यथा। अपहर्ताहमस्मीति मा ते मनसि भूद् भयं। विद्युद्वेषुन मे स्वकः प्रहर्तुं आ तु
वांछति। वक्ष्यंते तत्र शृंगारहास्यवीराद्भुता चत्वारो रसाः। तथाहि। इष्टनाशादिभिश्चेतो वैक्लव्यं शोक
एवं १
यथा वा। अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः। स्थानादनुच्चलन्नपि गत्वेव प्रतिनिवृत्तः ३

५ वनेतेऽक्ष्णोर्जातं सर्वममेध्यशोणितवसामांसास्थिलालामयं। भीरूणां भयदश्चपास्यद इति दर्वि-
घातिनीतात्मनीतन्मूढैः क्रियते तथाविधाभिर्वधोऽभिमानत्यरुः। अंगभंगादिभिस्त्वेनो विका-
रो हास्तउच्यते। आक्षिप्तदाक्षिक्ततवचनादीनि। यथा। नास्माकं जननी तथोज्ज्वलकुला सच्छ्रोत्रिया-
णां पुनर्व्यूढा काचन कन्यका खलु मया तेनास्मि तातोधिकः। अस्मत्पाल्लकीमित्रमहत्तुलसत्तु ताभि-
व्याभिशालायतनस्य संपर्कविशान्मया स्वर्गहरणी प्रेयस्यापि प्रोज्झिता। अहेतुः पक्षपातो यस्तस्य ना-
स्ति प्रतिक्रिया। स हि स्नेहात्मकस्तंतु रन्तर्मर्माणि सीव्यति। यथा। यस्य त्वया व्रणविरोपणमिंगु-
दीनां तैलं न्यषिच्यत मुखे कुशसूचिविद्धे। श्यामाकमुष्टिपरिवर्धितको जहाति सोऽयं न पुत्रकृ-
तकः पदवीं मृगस्ते। यथा वा। पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या नादत्ते प्रियमंडना

बंधं ५ वधः ।

जि

कौशि ४

कथं देवीकृताशन वतीखिनां। गीतकल्लेषु ते तापस्य प्रबोधः को धडव्यते। यथा। मध्येव विस्मरणदारुणा वि
लष्टलोहलोरहः प्रणयमप्रतिपद्यमाने। भे राङ्कुयोः कुटिलयो रतिलो हि तास्या भग्नं शरास नमभि
वातिरुषास्मरस्य। विस्मय चित्तविस्तारः परपौतिशयादिभिः। यथा। कृष्णेनाघ्रगते नरं तुमनसा
मुडुन्ति तास्तेच्छया सत्यं कृष्णकएवमाहत्तु शाली भिथ्यांवपश्यानन। आदेहीति विकाशितेत्तु वदने ह
हासमर्धजगन्मातायस्युजगाम विस्मयवशीपाया सवः केशवः। भयं चित्तस्य वैकल्व्यं रौद्रादिज
नितं विदुः। यथा। मंशान्तस्पुजितेज पाङ्गरक्ष कण्ठ्या ङ्किरिष्टान्सुरान् शुष्यन्नालुभिराकुलाकुलपदे नि
शं गिभिरुत्कं पिभिः। अधन्येरिह जीवितेशमहि तव्याधूम्रधूमाविलं लं घ्यंते करिमांसघस्मरणलौ
लेयकाः पल्लयः॥ जुगुप्सा गर्हणार्थानां दोषसंदर्शनादिभिः। यथा। तन्मध्ये नडुरस्तदेव वदने तेलो
लौ

२२ सो भया क्यो

नु २२

न:

तिरुक्ततो रसः। अथैषां स्थायिभावाः। रतिरुत्साहशोकौ च क्रोधाश्चर्य्यं भयं तथा। जुगुप्साहास वात्सल्य नि
र्वेदा धैर्य्यमेव च। द्वादश स्थायिभावास्ते गर्जिताः परिकीर्त्तिताः। क्रमेणैतेषामुदाहरणानि। मनोनुकू
लेष्वर्थेषु सुखसंवेदनं रतिः। विभावाद्यैरभिव्यक्ता सैव शृंगारतां गता। तद्रूपेण रसनिष्पत्तिर्यथा।
हरस्तु किंचित्परिवृत्तधैर्य्यश्चन्द्रोदयारंभ इवांबुराशिः। उमामुखे बिंबफलाधरोष्ठे व्यापारयामास
विलोचनानि। कार्यारंभेषु संरंभस्थेयानुत्साह उच्यते। तद्रूपेण रसनिष्पत्तिर्यथा। कर्म्मजीववतो
भिनाथ चरणावाप्तश्चासेनापतीनाभ्यासात्कृतुरखान्मुकुन्दप्रियसरतान् प्रेष्यान् समादिश्य च। आ
रंभे जगृहे महेंद्रशिखराद्धैर्न्नभोलंघने रहस्तीरघुनाथपादरजसा तु श्लैः स्मर मारुतिः। शोक
श्चित्तस्य वैधुर्य्यमभीष्टविरहादिभिः। यथा। यस्याः कुसुमशय्यापि कोमलांग्या रुजाकरी। साधिशेते

२

इंगो निधे २

९३

एयाति

दांत

२१

मामनंति। सापि प्रनिर्वेदविशेष एवेत्यवधेयम्। रुद्रादयस्तु सम्यक्ज्ञानप्रकृतिः शांतो विगतेच्छनायको भवति। सम्यक्ज्ञाने विषये तदसौ रागस्य चापगमादिति तत्त्वज्ञानप्रकृतिकत्वमंगीकुर्वन्ति। दांतो यथा। साधारणोभिरामः कः कन्यामन्योपि याचते। किं पुनर्जगतां जेता प्रपौत्रः परमेष्ठिनः। अत्र रामस्योदात्तप्रकृतेर्मतिर्नाकृत्ये विषये प्रवर्त्तते। प्रवृत्ता च नोपरमते। सा च सीतेयं मम स्वीकारयोग्येत्यवेरूपेण प्रवृत्ता रावणप्रार्थनालक्ष्मणाक्रोशाफ्रनाभ्यामुद्दीप्यमाना समुपजायमानजीजबाहुःस्था स्मृत्यादिभिः कालोचितैः सरानुमीयमानैश्चाविवेकचापल्यधैर्यादिभिः संस्कृज्यमानो दांतरूपेण निष्पद्यते। अयं च धैर्यस्थायिभावाख्यो दांतो रसः। उदात्तो यथा। क्षुद्राः संत्रासमेते विजहत हरयो भिन्नशक्रेभकुंभा युष्मद्देहेषु लज्जां दधति परममी सायका निःपतंतः। सौमित्रे तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः किंचिद्भ्रूभंगलीलानियमितजलधिं राममन्वेषयामि। अपि च वंगस्त्रिकूट

ग र्द्ध

भि ४

२१

श्र॰

प्रकृतिकत्वात्प्रास्यः। स्नेहे हि नैप्रकृतिः प्रियात् संगतिशीलार्प्पनायको भवति। स्नेहस्तु साहचर्य्यात्प्रकृतेरूपकार
संबंधात्। निर्व्याजिमनोवृत्तिःसंनमसद्भावपेशलालापः। अन्योन्यप्रीतिसुहृदोर्व्यवहारोयं समस्तत्र। यथा।
प्रस्वीदिभ्रमशङ्कि सुस्निग्धं स्फारलोचनालोकः। आर्द्रीकरणतयास्नेहादयं भवति सर्वत्र। यथा वा। कृ
ष्णत्वं नवयौवनोसि चपलाः प्रायेणगोपांगनाः कंसो भूपतिरब्जनालमृदुलग्रीवा वयं गोदुहः। तद्या
चेंजलिना भवंतमधुना वृंदावनं मा कृ नामायासीतिरिति नंदगोपवचसा ही णो हरिः पातु वः। अयं च
स्नेहप्रकृतिकत्वात्प्रेयान्। तदुक्तं। अहेतुःपक्षपातोयस्तस्य नास्ति प्रतिक्रिया। स हि स्नेहात्मकस्तंतु
रंतर्म्मर्माणि सीव्यति। शांतोयथा। मानेम्लानिनिरखंडिते च वसुनि व्यर्थे प्रयातेर्थिनि क्षीणे बंधुजने
गते परिजने श्रेष्ठे शनैर्यौवने। युष्माकं बलमेतदेव सुधियां यज्जह्नुकन्यापयःपूतग्रावगिरींद्रकंदं तु
रदरी कुंजे निवासः क्वचित्। अयं च निर्वेदस्थायिभावः शांतो रसः। अन्ये तु नरस्यव्रतिप्रकृतिकत्वात्

शारवाश्चमंदिरास्तेषां चित्रं १

र्षं हारादिभूषणं॥ फलं मम श्रुनि ह्मर्याणि शारवानंदन शालिनी। अयं चाद्भुतो विस्मयप्रकृतिकत्वात्। भयान
कोपमा। गर्वग्रंथिलगूर्जरज्वरकरः कर्णाटकर्णाटवीदावाग्निर्द्रविडेंद्रदर्पदलनो गौडेंद्रनिद्राहरः॥ हम्मी
रप्रमदामदालसलसद्भ्रूनर्त्तनस्तंभनः प्रस्थाने तव कंपडिंडिमडमत्कारः समुज्जृंभते। अयं च भयप्रकृ
तिकत्वाद्भयानकः। बीभत्सोपमा। पत्त्रैः कंकालकूटैरतिविकटतरां कंठमालां दधाना मज्जास्त्र्यानमत्ता
रसदशिवशिवाभिरवं क्रंदमाना। वेगादंभोधिकंठं फलमिव मृदुलं मुण्डमास्ये क्षिपंती क्षोणीमाकंप
यन्ती क्षयरजनिसमा राक्षसी प्रादुरासीत्। यथा वा। पायं पायं तवारीणां शोणितं पाणिसंपुटैः। कौणपाः
सह नृत्यंति कबंधै रंत्रभूषणाः। अयं च जुगुप्साप्रकृतिकत्वाद्बीभत्स इत्यभिधीयते। हास्योपमा। स्थाने
यस्य च रंतिभेक्तमानिशीतलेहे न सुष्मा दृशाः सस्यादभुतमूर्छिसिवन वशाःभुन्यः पवित्रालयः। किं त्वे
स्म स्मतिवेशिविप्रवनिता भ्रातुः प्रसक्तांगना हृता सप्रसवेति सूतकमिति स्थानांतरं गम्यतां। अयं च हास

१३ छेदोपघ५ २० २० १८

स्थानस्थापुरुकमौक्तिकोत्कराकिरः कैरस्य नायं किरः। उन्नीतश्चतुरंगसैन्यसमरत्वंगत्तुरंगक्षुर्ण्णक्षुल्लक्षुन्नि
त्तिषुन्तिपल्लिवशयशः क्षोणीजवीजव्रजः। अयं चतुर्विधोपि पुंसाहप्रकृतिकत्वाद्वीर इत्यभिधीयते। करु
णो यथा। गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ। करुणाविमुखेन मृत्युना हरता त्वां बत किं
न मे हृतं। यथा वा। हृदयान्नापयातोसि दिक्षु सर्वासु दृश्यसे। वत्स राम गतोसीति संतापादनुमीयसे। अयं शो
कप्रकृतिकत्वात्करुणः। रौद्रो यथा। अन्योन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्कपंके भग्नानां स्यंद
नानामुपरिकृतपदन्यासविक्रांतपत्तौ। स्फीतासृक्पानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कबंधे संग्रामै
कार्णवांतःपयसि विचरितुं पंडिताः पांडुपुत्राः। अयं च क्रोधप्रकृतिकत्वाद्रौद्रः। अद्भुतो यथा। आतोपस्तप
सांबल्लेन सहसा राजन्यतायां द्विजं स्पर्द्धाबंधकृता हलेन समं न्यञ्चं गलयाजीचयः। येनाकारि सहस्रलोच
नरुषा सर्गांतरं कौतुकाद्दृष्टांतः सहसा सचित्रविभवः श्रीगाधिसूनुस्तदा। यथा वा। अंशुकानि प्रवालानि पु

रम्म। दीर्घो छासस्त्र गितः विकलो कैपि नासत्पु टौं ता संख्या श्रन्यी गणयति भृगीलोच नाकेकण
नि। शापहेतुकोयथा। निश्वासेनाधरः किसलय स्केशिना विक्षिपंती शुक्लाना सरुष मलकन्न न
मार्गे डलैबि॥ मत्संयोगः सुखमुप नयेन्न स्वप्नजोपीति निद्रा माकांक्षंती नयन सलिलोत्पीडरुद्धाव का
शम्। अथवीरादीनां क्रमेणोदाहरणानि। तत्रवीरे दानधर्म्मदयायुद्धभेदा च्चतुर्विधः। आद्योयथा॥ ना
शिष्यः किमभूद्भवः किमभव न्नाशुत्रेणी रेणुका नाभूद्विश्वमकार्म्मुकं किमपि वः प्रीणातु रामत्रपा।
विप्राणां प्रतिसंहरं मणिगणो भिक्षाणि दंडाहते नाब्धीनां समयाय मोधपनहिषेण प्रोक्षितो क्वाहितः।
द्वितीयो यथा। राज्यंवस्तु च देहश्च भार्य्या भ्रातृसुताश्चये। यच्च लोके मदायत्तं तक्ष्मायस दीयताम्।
तृतीयो यथा। तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टंभ विमुक्तवाहुः। सन्यस्तशस्त्रो हरये स्वदे
हमुपानयत्पिंडमिवामिषस्य। चतुर्थोयथा। निस्त्रिंशत्रुटितारिवारणघटा कुंभास्थिकूटावर

त। गुर्वादिपारतंत्र्येण सूनोर्देशांतरे स्थितिः। प्रवासोऽथ मुनिकोपेनयंत्रणोशाप उच्यते। मुनिरि
त्युपलक्षणम्। दैवतादीनां। यूनोरेकतरस्मिन् गतवति लोकांतरं पुनः। लभ्ये विमनायते य
देकस्तदा भवेत् करुणविप्रलंभ इति किं? शृंगारितनायकादिविषयः करुणविप्रलंभोप्यन्योऽस्तीति भावः। क्रमेणो
दाहरणानि॥ नवं पल्लवमेभिः कितस्यालज्जालीलाविलोचनं। अंतःस्मितसुधासिक्तं भूयाद्द्रवं वो मयि।
विरहे यथा। समानकुलशीलयोः समरुचोः परायत्तयोः परस्परविलोकनाकुलितचेतसोः प्रेयसोः॥
ननु त्वमनुविंदतो बंधुविधौ विधिर्निंदतो रहः क्वापि निवेदनाविधेदनावर्द्धते॥ ईर्ष्याहेतुको यथा। कांते
नप्रहितं करेपरिरूढैर्नीतं निवेश्यादरात् सौलोमन्मथलेखमन्यसुदृशो दृष्ट्वाथ ता साक्षरम्। नासाग्रन्य
हितांगुलीकिसलयं पाणौ निधिकाननं दीर्घनिःश्वसितं मनाग्विहसितं धूतं च तन्व्या शिरः। प्रवा
सहेतुको यथा। सांत्वप्रायैर्नयनसलिलैः कुङ्मा क्षमानेकांतेतिर्यङ्मितवदना रुंधती बाष्पमु

विनयवचनैः

ह

रतिभावाल्लंबनालाभत्वं विप्रलंभत्वं। तदुक्तं   महाराजेन। भावोथदा रतिर्नाम प्रकर्षमधिगच्छति। नाधिगच्छति चाभीष्टं विप्रलंभस्तदोच्यते इति सत्व २

स्मितेऽज्झस्थितं तन्व्या तल्लिङ्गमंदिरे निजसखीभ्रांत्या तया विष्कृतं। कांते तु स्तनयोरथ स्तनयति क्षोभं सखी तु जनाबालामीलितदृष्टिनम्रवदनाश्लिष्टां तु योगञ्जाति (? पंथाव) आयाता सि विधुं त्वं वेपथु भरं दृष्ट्वासि केनापि नो नीलं चोलमस्तु चमुं च हर तु स्वेदं निशीथानिलः। इत्येतस्य स्वं कंठमसक्तुघामीति तल्पं गता त्रस्यंती परिरभ्यत सुकांताभिः स्वैरं न वस्त्रे शिरणी। अपरस्त्वभिलाषविरहेर्ष्याप्रवास शापहेतुक इति पंचधा। स च संगमप्रत्याशा कालीनस्तदुत्पादः अभिलाष इच्छा। देशो कोपि तु र्व्यादिपारतंत्र्यं विरहः देशैक्यदर्शनविशेषणात्प्रवासाद्भेदः कथितः। अत एव प्रोषितभर्तृकाविरहोत्कंठिताभिन्नेति कथ्यते। एवं तंत्रे छेदेन मुनिना तथैव विभागकरणात्। सपत्नीसंगते कांते कोप ईर्ष्यासमुद्भवः। प्रणयकोपहेतुको विप्रलंभ इति केचि

द्वि भावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः तिस्त्रे कथं मिलितानां निर्देश इति चेत् उच्यते।

गतः पुनः स्याडुद्दिपास्सभाङ्गः पश्यपेम कोदंडमनानतज्यम्) इत्युत्सुकस्तत्र सरामभञ्जो निद्रादरि
९२ द्रिरजनीमनैषीत्। इत्यादौ प्रत्येकमेव रसोद्बोधान्मिलितानां हेतुत्वमिति चेत्। नो इष्टापत्तेः।
नचसूत्रे मिलितानां कथमुपादानमिति वाच्यम्। व्याघ्रादीव भावानां पृथगनैकांतिकत्वं
बोधयितुमिति केचित्। केचित्तु यत्रान्यन्नास्ति तत्रान्यत्तमध्याहृत्य इति वदंति। अथैते छेव
केषांचिद्विशेषानभिदध्महे। तत्र शृंगारवीरकरुणारौद्राद्भुतभयानकाः। बीभत्सहास्यप्रेयांसशांतो
दात्तोद्धतारसाः। तत्र शृंगारो विप्रलंभसंभोगभेदेन द्विधा। उभयोरपि रतिप्रकृतिकत्वात्। तत्रा
द्यः परस्परावलोकनचुंबनाद्यनेकप्रकारोपि संभोगत्वसामान्यमाश्रित्य एक एव गण्यते।
संभोगत्वं च रतिप्रकृतिकत्वे सति विप्रलंभभिन्नत्वं। यथा। विन्यस्तौ करपल्लवे करतले भेद

संभोगो विप्रलंभश्च शृंगारो द्विधा मतः ३

रुमोदनाय मिलिते दा
तथा सजातीयविजातीयैरतिरस्कृत मूर्त्तिमान् । किं च आवक्रसंवर्त्तमानः स्थायी भाव उदाहृत इति ४

अत एवाह मुनिः। विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः। आत्मभावं नयत्यन्यान्स स्थायी लवणाकरः। अन्ये
प्याहुः। चिरं चित्तेऽवतिष्ठन्ते संबध्यन्तेऽनुबंधिभिः। रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनोऽत्र ते। विरोधितया
भिचारिषूदासाय। अनुबंधिभिर्भावादिभिः। ननु सर्पदनुकुलितेयं किंशुकानां वनाली ललितम
धुपमाला विभ्रमं संतनोति। इह घनमकरंदास्यंदभूर्माल्लवाली विलसति सहकारश्रेणिराकं
